उत्सारयन्तु सकलान् इमान् लोकान् गणा द्रुतम् ।
अवतारे महादेवि त्वञ्चाप्युत्सारय द्रुतम् ॥
ततो गणाः कामरूपाद्वै चाप्यपराजिता ।
लोकानुत्सारयामासुः पीठं कर्त्तुं रहस्यकम् ॥
उत्सार्य्यमाणे लोके तु चतुर्व्वर्णैर्हि जातिभिः ।
सन्ध्याचलं गतो विप्रो वशिष्ठः कुपितो मुनिः॥
सोऽप्युग्रतारया देव्या उत्सारयितुमीशया ।
गणैः सह धृतः प्राह शापं कुर्व्वन् सुदारुणम् ॥
यस्मादहं धृतो वामि त्वयोत्सारयितुं मुनिः ।
तस्मात्त्वं वाम्यभावेन पूज्या भव समन्विका ॥
भवत्यान्ति म्लेच्छवद्यस्मादगणास्ते मन्दबुद्धयः ।
भवन्तु म्लेच्छास्तस्माद्वै भवत्याः कामरूपके॥
महादेवोऽपि यस्मान्मां निःसारयितुमुद्यतः ।
तपोधनं मुनिं दान्तं म्लेच्छवद्वेदपारगम् ।
तस्मात् म्लेच्छप्रियो भूयात् शङ्करश्चास्थिभस्म-
धृक् ॥"

इति कालिकापुराणे ८३ अध्यायः ॥*॥
शङ्करगीता देवीपुराणे ७ अध्याये द्रष्टव्या ॥
शिवावतारविशेषः । यथा,—
"तद्भवान् लोकरक्षार्थमुत्साद्य निखिलान्
खलान् ।
वर्त्म स्थापयतु श्रौतं जगद्येन सुखं व्रजेत् ॥
इत्युक्तोपरतान् देवानुवाच गिरिजाप्रियः ।
मनोरथं पूरयिष्ये मानुषमवलम्ब्य वः ॥
दुष्टाचारविनाशाय धर्म्मसंस्थापनाय च ।
भाष्यं कुर्व्वन् ब्रह्मसूत्रतात्पर्य्यार्थविनिर्णयम् ॥
मोहयन् प्रकृतिर्हि तध्वान्तमध्याङ्कभानुभिः ।
चतुर्भिः सहितः शिष्यैश्चतुरैर्हरिवङ्गजैः ॥
यतीन्द्रः शङ्करो नाम्ना भविष्यामि महीतले ।
महत्तथा भवन्तोऽपि मानुषीं तनुमाश्रिताः ॥
तं मामनुसरिष्यन्ति सर्व्वे त्रिदिववासिनः ।
तदा मनोरथः पूर्णो भवतां स्यान्न संशयः ॥"
इति माधवीयसंक्षेपशङ्करजये १ सर्गः ॥*॥
( अयं हि द्वात्रिंशद्वर्षवयसि भौतिकशरीरं
परित्यज्य परब्रह्मणि लीन आसीत्। यथा,तत्रैव
"एवं प्रकारैः किल कल्मषघ्नैः
शिवावतारस्य शुभैश्चरित्रैः ।
द्वात्रिंशदस्योज्ज्वलकीर्त्तिराशेः
समा व्यतीयुः किल शङ्करस्य ॥")
मङ्गलकारके, त्रि । यथा,—
"क्षेमङ्करोऽरिष्टतातिः स्याच्छिवङ्करशङ्करौ ॥"
इति त्रिकाण्डशेषः ॥
(यथा च महाभारते । ३ । २२८ । ६ ।
"हिरण्यगर्भ शङ्कर ते लोकानां शङ्करो भव ॥")
शङ्करप्रियः,पुं,(शङ्करस्य प्रियः ।) तित्तिरिपक्षी ।
इति केचित् ॥ शिववल्लभे, त्रि । ( यथा, कथा-
सरित्सागरे । ८५ । ८८ ।
"एतद्गणेभ्यः श्रुत्वा सा शरण्या शङ्कर-
प्रिया ।
शान्तानङ्गाखयोऽर्प्यते जीवन्त्विति समादि-
शत् ॥")

शङ्कराचार्य्यः,पुं, (शङ्कर आचार्य्यश्च ।) स्वनाम-
ख्याताचार्य्यः । स तु अद्वैतवादी वेदान्तभाष्य-
कर्त्ता च । यथा,—
"श्रीशङ्कराचार्य्यमवावतारं
विश्वेश्वरं विश्वगुरुं प्रणम्य ।
वेदान्तशास्त्रश्रवणालसानां
बोधाय कुर्व्वे कमपि प्रयत्नम् ॥"
इति मधुसूदनसरस्वतीकृतसिद्धान्तविन्दुप्रथम-
श्लोकः ॥
शङ्करावासः, पुं, ( शङ्करस्य आवास इव शुक्ल-
त्वात् । ) कर्पूरभेदः । इति राजनिघण्टः ॥
(शङ्करस्य महादेवस्य आवासः । कैलासश्च ॥
शङ्करी, स्त्री, मञ्जिष्ठा । इति शब्दचन्द्रिका ॥
शमी । इति राजनिर्घण्टः ॥ शङ्करभार्य्या ।
यथा ।
"शङ्करी शम्भुपत्नी च शिवा शतनिनादिनी ।
शुभा शुभप्रदा नित्या शतसूर्य्यसमप्रभा ॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम् ॥
शङ्का,स्त्री, (शङ्क + अ । स्त्रियां टाप् ।)त्रासः ।
( यथा, हितोपदेशे ।
"शङ्काभिः सर्व्वमाक्रान्तमन्नं पानञ्च भूतले ।
प्रवृत्तिः कुत्र कर्त्तव्या जीवितव्यं कथं नु वा ॥")
वितर्कः । इति मेदिनी ॥ ( यथा, भागवते ।
८ । २ । ६ ।
"यत्र संगीतसन्नादैर्नदद्गुहममर्षया ।
अभिगर्ज्जन्ति हरयः श्लाघिनः परशङ्कया ॥")
शङ्कितः, त्रि, ( शङ्का जाता अस्य । शङ्का +
इतच् ।) भीतः । इति त्रिकाण्डशेषः ॥ (यथा,
"अशङ्क्यमपि शङ्केत नित्यं शङ्केत शङ्कितान् ॥")
वितर्कितः । इति शङ्काशब्दार्थदर्शनात् ॥ चोरक
नामगन्धद्रव्ये, पुं । इति राजनिर्घण्टः ॥
शङ्कितवर्णकः,पुं,(शङ्कितं अत्र कोऽप्यस्तिनास्ती-
त्यादिकं वा वर्णयति तर्कयतीति । वर्णि +
ण्वुल् । ) चौरः । इति त्रिकाण्डशेषः ॥
शङ्कुः पुं, (शङ्कतेऽस्मादिति । शङ्क+"खरशङ्कु-
पीयुनीलङ्गुलिगु ।" उणा० १ । ३७ । इति
कुप्रत्ययेन निपातितः । ) स्थाणुः । मुड़ा गाछ
इति भाषा । मत्स्यविशेषः । शाँकोच इति
भाषा । शस्त्रास्त्रम् । शेल इति भाषा । इत्य-
मरभरतौ ॥ संख्याविशेषः । स तु लीलावती-
मते दशलक्षकोटिः । कीलः । गोँज इति
भाषा । ( यथा, मनुः । ८ । २७१ ।
"निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः"
ईशः । कलुषः । इति मेदिनी ॥ पर्व्वशरा-
लाशम् । मेढ्रः । इति हेमचन्द्रः ॥ राक्षसः ।
इति शब्दमाला ॥ नखीनामगन्धद्रव्यम् ।
इति जटाधरः ॥ दीपसूर्य्ययोश्छायापरिमाणार्थं
काष्ठादिनिर्म्मितः क्रमेण सूक्ष्माग्रद्वादशाङ्गुल-
परिमितः कीलकः । यथा ।
"अर्काङ्गुला तु सूच्यग्रा काष्ठी द्वाङ्गुलमूलिका
शङ्कुसंज्ञा भवेत्तैव तच्छायां परिकल्पयेत् ॥
मध्याह्नहीनेरादित्ययुक्तैश्छायाङ्गुलैर्हरेत् ।

पटपूरितदिवादण्डं लब्धं दण्डादिकं भवेत् ॥
पूर्व्वाह्नच्छाययातीतं पराह्नच्छाययैष्यकम् ।
शून्यैकरामवाणेभदिशो रुद्राः । ० । १ । ३ ।
५ । ८ । १० । ११ । क्रमोत्क्रमैः ॥
आषाढ़ादिषु मासेषु छाया माध्याह्निकी मता
अयनांशजमासान्ते व्युत्क्रमेणादितो बुधैः ।
संक्रान्त्यादिने भागहारे ह्रासोत्तरे तथा ॥"
इति ज्योतिस्तत्त्वम् ॥
तस्य नामान्तरं नरः । यथा,—
अथ करणसूत्रम् ।
"शङ्कुः प्रदीपतलशङ्कुतलान्तरघ्न-
श्छाया भवेद्विनरदीपशिखौच्चभक्तः ।"
उदाहरणम् ।
"शङ्कुप्रदीपान्तरभूस्त्रिहस्ता
दीपोच्छ्रितिः सार्द्धकरत्रया चेत् ।
शङ्कोस्तथार्काङ्गुलसंमितस्य
यस्य प्रभा स्यात् कियती वदाशु ॥"
न्यासः । शङ्कुः १२ भूः ३ दीपः ७ लब्धानि
छायाङ्गुलानि १२ । इति लीलावत्यां छाया-
व्यवहारः द्वादशाङ्गुलपरिमाणम् । यथा । विष्णु
धर्म्मोत्तरीयप्रथमकाण्डम् ।
"द्वादशाङ्गुलिकः शङ्कुस्तद्द्वयन्तु शयः स्मृतः ।
तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुः सहस्रिकः ॥"
इति तिथ्यादितत्त्वम् ॥
( जनमेजयस्य पुत्त्रः । यथा, महाभारते । १ ।
८५ । ८६ ।
"भवतो वपुष्टमायां द्वौ पुत्त्रौ जज्ञाते शतानीकः
शङ्कुश्च ॥" * ॥ उग्रसेनस्य पुत्त्रविशेषः । यथा,
भागवते । ८ । २४ । २४ ।
"कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहुस्तथा
राष्ट्रपालोऽथ धृष्टिश्च तुष्टिमानौग्रसेनयः ॥" )
शङ्कुकर्णः पुं, (शङ्कुरिव कर्णौ यस्य ।) गर्द्दभः ।
इति त्रिकाण्डशेषः ॥ ( दानवविशेषः । यथा,
हरिवंशे । ३ । ८१ ।
"शङ्कुकर्णौ विवादश्च गवेष्टी दुन्दुभिस्तथा॥"
नागविशेषः । यथा, महाभारते । १ । ५७ ।
१५ ।
"शङ्कुकर्णः पिठरकः कुठारमुखसेचकौ ॥"
शङ्कुसदृशकर्णविशिष्टे, त्रि । यथा, भागवते ।
७ । ८ । १५ ।
"श्राम्यत्सटः क्षतजकेशरशङ्कुकर्णा-
न्निक्रादभीतदिगिभादरिभिन्नखाग्रात् ॥")
शङ्कुचिः. पुं, शङ्कुमत्स्यः । इति शब्दरत्नावली ।
शङ्कुतरुः, पुं, ( शङ्कुरिव तरुः । ) शालवृक्षः ।
इति शब्दरत्नावली ॥
शङ्कुरः त्रि, ( शङ्कतेऽस्मादिति । शङ्क + बाहुल-
कात् उरच् । ) त्रासदायी । इति हेमचन्द्रः ॥
शङ्कुला, स्त्री, ( शङ्कुपूर्व्वात् लातेः 'आतोऽनुप-
सर्गे कः । ३ । २ ।३ । इति के शङ्कुला ।"इत्यु
णादिवृत्तौ उज्ज्वलः । १ । ३७ ॥ "शङ्कुपूर्व्वा-
ल्लातेर्थ अर्थे कविधानमिति वा कप्रत्ययः ।"इति
काशिका । ६ । २ । २ । ) उत्पलपत्रिका । इति